॥ श्रीः ॥

मन्वन्तर-निर्धारः

समीक्षाचक्रवर्तिनः—
स्व० पं० श्री मधुसूदन शर्म्म मैथिलाः

॥ श्रीः ॥

समीक्षा चक्रवर्ति-विद्यावाचस्पति-महामहोपदेशक-
विद्वद्वर्य—स्व० पं० श्री मधुसूदन ओझा
विरचितः ।

मन्वन्तर-निर्धारः

सोऽयम्
पं० श्री सुरजनदासस्वामिना एम० ए०
साहित्य-व्याकरण-वेदान्त-सांख्य-योगाचार्येण
संपादितः प्रकाशितश्च ।

प्रथमावृत्तिः ५००

वि० सम्वत् २०२०

मूल्यम् २) रूप्यक द्वयम्

सर्वेऽधिकाराः प्रकाशकाधीनाः ।



समीक्षा चक्रवर्ति स्व० पं० मधुसूदन शर्म्म मैथिलाः
लन्दन नगरे सं० १९०२ ई०

॥ श्रीः ॥

प्राक्कथन

पूज्य पिताजी के रचित ग्रन्थों के प्रकाशन का कार्य यथाशक्य किया जा रहा है परन्तु जैसा कि मेरा विचार था कि १०० ग्रन्थ शीघ्र प्रकाश में आजावें वह कई परिस्थितियों के कारण अभी तक नहीं हो सका, करीब ६० पुस्तकें ही मुद्रित हो सकी हैं।

यह जो "मन्वन्तर निर्धार" नामक पुस्तक प्रकाशित हुई है इसका श्रेय स्वामी श्री सुरजनदासजी को है, इसका संपादन तथा प्रकाशन स्वामीजी ने अपने ही परिश्रम तथा व्यय से किया है।

स्वामीजी मेरे पूज्य पिताजी के उन शिष्यों में से हैं, जिन्हों ने वर्षों उनसे नियम पूर्वक अध्ययन किया है। यह गुरु में पूर्ण श्रद्धा एवं भक्ति रखने वाले हैं। अपने अन्य कार्यों के अतिरिक्त तन-मन-धन से इन ग्रंथों के प्रकाशन के लिये सन्नद्ध रहते हैं और भविष्य के लिये बहुत चिन्तित रहते हैं।

इनकी इस हार्दिक अभिरुचि को देखकर मुझे बड़ा सन्तोष है साथ ही आशा ह नहीं पूर्ण विश्वास है कि स्वामीजी मेरे प्रतिनिधि के रूप में इस मौलिक राष्ट्रिय निधि की संरक्षी तथा प्रकाशन का दायित्व अवश्य सम्हालेंगे।

जयपुर
(राजस्थान)
२७-३-६३.

प्रद्युम्न शर्म्मा ओझा

॥ श्रीः ॥

प्रास्ताविक

वेदविद्योद्धारक, वेदरहस्य-प्रकाशक, समीक्षाचक्रवर्ती, विद्यावचस्पति, स्वर्गीय पूज्य गुरुवर्य श्री मधुसूदनजी महाराज ने सहस्राब्दियों से विलुप्त वैदिक विज्ञान को प्रकाश में लाने के लिये यावज्जीवन भगीरथ प्रयास किया। तत्तच्छास्त्रीय परिभाषाओं के ज्ञान के विना किसी भी शास्त्र के मर्म को नहीं समझा जा सकता, इसलिये उन्होंने वेदों की व्याख्या आदि न कर उनके रहस्यों का उद्घाटन करने वाली वैदिक परिभाषाओं के ज्ञानार्थ परिभाषासम्बन्धी ग्रन्थों का प्रणयन किया। एतदर्थ १५० से अधिक ग्रन्थों की रचना की। इन ग्रन्थों को उनने ब्रह्मविज्ञान, यज्ञविज्ञान, पुराण-समीक्षा, वेदाङ्गसमीक्षा इन प्रधान चार विभागों में विभक्त किया।

यद्यपि वेदों के रहस्यों का उद्घाटन और तदर्थ वैदिकपरिभाषासम्बन्धी ग्रन्थों का प्रणयन आपका प्रधान लक्ष्य था, तथापि पुराणों की सहायता के विना इस उद्देश्य की पूर्ति नहीं हो सकती। जैसा कि—

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति॥

इस वचन से प्रतीत हो रहा है। अतः पौराणिक पारिभाषिक शब्दों के स्पष्टीकरण के लिये पौराणिकतत्त्वोद्घाटनपरक पुराणसम्बन्धी ग्रन्थों की भी रचना की। प्रकृत लघुग्रन्थ "पुराण-समीक्षा" विभाग के अन्तर्गत 'विश्वविकास' नामक अवान्तर विभाग का प्रथम पुष्प है।

इस पुस्तक में पुराणप्रतिपादित मन्वन्तर का निरूपण है। किन्तु मन्वन्तरनिरूपण के अतिरिक्त युग, दिव्ययुग, नित्यकल्प, सप्तकल्प व त्रिंशत् कल्प का निरूपण भी इसमें किया गया था। जैसा कि इस ग्रन्थ के प्रथम श्लोक को देखने से स्पष्ट प्रतीत होता है। इनमें से युग, दिव्ययुग व त्रिंशत् कल्प का निरूपण तो इसमें उपलब्ध है। और नित्यकल्प तथा सप्त कल्प का निरूपण प्रकृत ग्रन्थ में नहीं है। सम्पन्न प्रति के देखने से प्रतीत होता है कि वह अंश लिपिकर्ताओं के प्रमाद से क्रोडपत्रों से लिपिबद्ध करने में छूट गया। क्योंकि सम्पन्न प्रति में स्पष्ट लिखा हुआ है कि 'नित्यकल्प व सप्तकल्प का पाठ लिखना बाकी है'। अब बहुत समय के पश्चात् वे क्रोडपत्र भी अस्तव्यस्त या नष्ट हो गये जिससे प्रयास करने पर भी वह अंश उपलब्ध नहीं हो सका। स्वर्गीय पं० जी महाराज के सुपुत्र तथा इस अपूर्व निधि के संरक्षण व प्रकाशन में अपने जीवन को समर्पित करने वाले पं० श्री प्रद्युम्नजी ओझा ने भारत के कतिपय लब्धप्रतिष्ठ विद्वानों से पत्रव्यवहार कर पुराणों के उन स्थलों को मालूम करने का पर्याप्त प्रयास किया जिनमें नित्यकल्प व सप्त कल्पों का निरूपण किया गया हो। किन्तु बहुत समय बीत जाने पर भी जब इस प्रयास में सफलता नहीं मिली तब जो उपलब्ध था उसे ही प्रकाशित करने का निश्चय किया गया।

इस छोटीसी पुस्तक में उपर्युक्त-मन्वन्तर, युग, दिव्ययुग तथा त्रिंशत् कल्प के अतिरिक्त प्रवाहरूप से सृष्टि की अनादिता व अनन्तता का निरूपण तथा काल शब्द का निर्वचन अत्यन्त मार्मिक तर्कपूर्ण रीति से किया गया है और इसमें आपतित श्रुतिविरोध का परिहार भी किया गया है। इस प्रकार यह ग्रन्थ सृष्टि की प्रवाहरूप से नित्यता, मन्वन्तर, युग, दिव्ययुग, कल्प, त्रिंशत् कल्प आदि विषयों के स्पष्टीकरण के लिये अत्यन्त उपयोगी है। संस्कृतभाषानभिज्ञ पुराणप्रेमी जनों के लिये इस ग्रन्थ का हिन्दी रूपान्तर भी विशदरूप से प्रस्तुत किया गया है। इस अनुवाद में मूल ग्रन्थ के आशय को स्पष्ट करने का प्रयास तो किया गया है, किन्तु उसमें कहाँ तक सफलता मिली है यह विज्ञ पाठक ही मालूम कर सकते हैं। पौराणिक विषयों के अज्ञान से यत्र तत्र जो कोई त्रुटि रह गई हो उसके लिये विद्वान् पाठक सुझाव देकर अनुगृहीत करें जिससे आगामी संस्करण में उसका संशोधन किया जासके।

विनीत

दिनांक ४-४-६३.

सुरजनदास स्वामी



अथ मन्वन्तरनिर्धारः

युगं दिव्ययुगं नित्यकल्पः कल्पाश्च सप्त ये ।
त्रिंशत् कल्पाश्च कल्पन्ते मन्वन्तरनिरूपणे ॥

सादि सान्तं जगत्—कार्य्यत्वात् । कार्य्याणां हि सर्वेषां जन्मस्थितिभङ्गं परिपश्याम इत्येकं मतम् ॥ १ ॥ अनाद्यनन्तंहीदं जगत्—प्रवाहनित्यत्वात् । यथा हि जलोर्म्यादीनां प्रतिक्षणं वैलक्षण्येऽपि गङ्गा-प्रवाहः शाश्वतिको न विरम्यते, एवमेषां सर्वेषां जगद्भावानां प्रतिक्षणवैलक्षण्येऽपि जगत्प्रवाहः शाश्वतिको न विरम्यते इत्यपरं मतम् ॥ २॥ तत्र मतमुत्तरं साधीय इति सुधियः पश्यन्ति । जगदभावदशायां कारणा-नुपपत्त्या जगदुत्पत्तेराकस्मिकत्वप्रसङ्गात्, आकस्मिकतावादस्य च कृतधीसमयबहिर्भूतत्वात् । ईश्वरे-च्छापि नाकस्मिकी भवितुमर्हति । न च स्वातन्त्र्यमीश्वरस्येच्छाकरणाकरणयोर्निमित्तमिति वाच्यम् । ईश्वरेच्छाया नित्यत्वसिद्धान्तात् । ईश्वरेच्छाया ईश्वररूपतया तस्याः कादाचित्कत्वेऽन्यथान्यथेच्छावतस्तस्य वैकारिकत्वापत्तेः ॥ तस्मान्नित्यैवेश्वरेच्छा भवितुमर्हति, अतएव च नित्यं जगदिति संप्रतिपन्नम् ॥ ० ॥

ननु जगन्नित्यत्वे श्रुतिसिद्धो मुक्तिवादो विरुध्येतेति चेन्न । व्यक्तिविशेषस्य मुक्त्या संसार-विच्छेदेऽपि जगद्विच्छेदस्यानभिप्रेतत्वात् । क्षीणे पापे पुण्ये वा मर्त्यलोकं विशन्तीति पुनरावृत्तिं दर्शयन्ती श्रुतिरपुनरावृत्तिं मुक्तिमभिप्रैति न मर्त्यलोकाभावम् ॥ मृत्युमत्येतीत्यात्मनो मृत्युसंम्बन्धाभावलक्षणा मुक्तिरिष्यते न तु मृत्युलक्षणस्य जगतो विध्वंसः । कैवल्यमप्यात्मनो वासनादिसंसर्गशून्यत्वलक्षणमेव स्यान्न तु जगद्विध्वंसलक्षणम् । युक्तं चैतत् । अन्यथा केषांचिदपि प्राचां वामदेवशुकादीनां योगिना-मेकस्यापि मुक्त्या सर्वजगदुच्छेदे सर्वेषां प्रातिस्विकतया मुक्त्यर्थं यत्नो व्यर्थः स्याद् ॥ दृश्यते हीदानी-मपीदं जगदिति दृष्टिविरोधश्च स्यात् । यैः पुनरिदानीं यावदेकस्यापि मुक्तिर्नैवाभूत्, भविष्यति चैकस्यापि मोक्षे सर्वजगदुच्छेदः स्यादेवेत्यास्थीयते तैरयं मुक्तिपदार्थ एवहि भङ्गयन्तरेणापलप्यते । महामहिमभाजां प्राचामेव महर्ष्यादीनामेकस्यापि मुक्तिसाधनायासामर्थ्ये दृष्टे मुक्तेरसंभवदर्थतायां एवापाततः सिद्धेः ॥ तस्मान्मुक्तात्मनः स्वीयसंसारविच्छेदेऽपि जगद्विच्छेदो नास्तीति सिद्धम् ॥ ० ॥

ननु जगन्नित्यत्वे "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभि संविशन्ती" त्यादि – श्रुतिसिद्धं जगतो जन्मस्थितिभङ्गं विरुध्येतेतिचेन्न ॥ स्वाप्नप्रपञ्चस्य वैज्ञानिकत्व-वदस्य जगतो ब्रह्मविवर्तत्वे श्रुतितात्पर्य्यात् । अतएव—

"ब्रह्मैवेदं सर्वं नेह नानास्ति किञ्चनेत्यादि- श्रुतिभिरस्य ब्रह्मतादात्म्यं श्रयते । तत्र ब्रह्मणो नित्यत्वात् तद्विवर्तसिद्धस्यास्य जगतो ब्रह्मात्मकस्य नित्यत्वं सुतरामुपपन्नमिति नास्ति विसंवादः ॥ ० ॥

अथाप्याहुः । अस्ति खलु ब्रह्मणा जगतः षड्विकल्पसिद्धः सम्बन्धः—विश्वस्मिन् ब्रह्मेत्येकः । ब्रह्मणि विश्वमिति द्वितीयः । ब्रह्म विश्वमिति तृतीयः । भिन्नं ब्रह्मणो विश्वमिति चतुर्थः । विश्वस्माद्ब्रह्म भिद्यते विश्वंतु ब्रह्मणो नातिरिच्यते इति पञ्चमः । अनिरुक्तं जगदिदमनिरुक्तेन ब्रह्मणा युक्तमनिरुक्तेनैव योगेनेति षष्ठः । स एष षड्विकल्पः संबन्धः ॥ तस्यैतस्य सम्बन्धस्य मृद्घटसम्बन्धानतिरेकाद् घटवदस्य जगतः कार्य्यत्वमनित्यत्वं च प्राप्नोतीति चेत् सत्यम् । परिणामवादवद् विकाशवाद-विवर्तवादयोरप्यस्य सम्बन्धस्याविशेषाज्जगतो नित्यत्वस्यापि तावता सुलभत्वात् ।

अथवाऽस्तु परिणामवादादस्यानित्यत्वमथापि नानित्यत्वमपोद्यते नित्यत्वं तु स्थाप्यते । यथा हि कुलालचक्रं चलं चाचलं च । अवयवतो गतिमत्वात् समुदायतश्च गति शून्यत्वात् । एवमिदं जगन्नित्यं चानित्यं च । अवयवतो विकृतिभिः क्षुभ्यमाणत्वात्, समुदायतस्तु प्रकृत्याऽवस्थितत्वात् । यदिदं जगत् प्रतिक्षणविलक्षणं भवद् दृश्यते तदेवंरूपमेव शश्वदनुवर्तते । न त्वेवेदं कदापि नासीत्, न त्वेव वा कदापि न भविष्यतीत्येवमातिष्ठामहे । ये त्वस्यारम्भवादाः श्रयन्ते सर्वेऽपि तेऽवान्तरकाण्डविभागारम्भाभिप्राया द्रष्टव्या इति नास्ति विसंवादः ॥ तदित्थं जगतः प्रवाहनित्यत्वे सिद्धे तदुपक्रमपर्य्यवसानाभावाज्जगतः कालोऽप्यनाद्यनन्त इति नास्ति तदाकलनापेक्षा ॥ ० ॥

अवयवतस्तु परिणामित्वात् परिणामविशेषावधारणार्थं भवति कालापेक्षा । कियता कालेन कदा कीदृशं परिवर्तनमभूत् कदा वा किं भविष्यतीत्येवमादीनां जगद्रूपाणां विकारविशेषाणां विज्ञानस्य कालज्ञानाधीनत्वात् । तस्मादनाद्यनन्तस्यापि कालस्यावान्तरक्रियाविशेषानुरोधेनावयवान् प्रकल्प्य महाकालावयवभूतास्ते खण्डकालाः पूर्वपूर्वाध्यूढरूपा अनेके नियम्यन्ते । तेषामयमेको मन्वन्तरं नाम । तदुपलक्षणमितरेषां खण्डकालानाम् ॥

सर्वक्रियाश्रयभूता ब्रह्मसत्ता कालः । गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते । अस्ति हीयमेकानाद्यनन्ता महती क्रिया जगद्रूपा प्रकृतिर्नाम । तदाश्रयभूता ब्रह्मसत्ताऽनाद्यनन्तो महाकालः । अथास्ति चान्या त्रिक्षणस्थायिनी क्षणिकास्तिनास्तिलक्षणा काचित् सूक्ष्मातिसूक्ष्मा क्रिया । तदवच्छिन्ना ब्रह्मसत्ता कला नाम । कलानां समूह एव कालः । स च खावच्छेदिकानां खण्डक्रियाणां शरीराणुत्वमहत्वतारतम्यानुरोधादणुमहद्रूपेणानेकधा व्यवतिष्ठते । क्रियाविशेषाणामुत्पत्तिध्वंसाभ्यामवच्छेदात् कृतरूपः कालः स्थित्यवच्छेदको भवतीति स्थितिकालविज्ञानं जगद्रूपविज्ञानाय नितरामुपयुज्यते ॥

अस्ति चैका क्रिया सूर्य्यविकाशो नाम । सूर्य्योऽयं ज्योतिर्म्मयपिण्डः प्रादुर्भूय तिरोभूय च भूयोभूयः प्रादुर्भवति च तिरोभवति च । तस्य प्रादुर्भावतिरोभावावच्छिन्ना स्थितिरेव सृष्टिकालोऽभ्युपगम्यते । ब्रह्माण्डसृष्टेरेवेह सृष्टित्वेन विवक्षितत्वात् । सूर्य्यप्रकाशमयमण्डलव्याप्तिमत्प्रदेशस्यैव च ब्रह्माण्डत्वात् ॥ तदुक्तम्—

इत्थं ब्रह्माण्डमध्यस्थो यो ब्रह्मा समपद्यत ।
सूर्यः स एतद्ब्रह्माण्डं ज्योतिषां मण्डलं महत् ॥ इति ॥

मन्वन्तर चक्रम्

सृष्टिप्रलयलक्षणे कल्पसञ्ज्ञे ब्राह्म ऽहोरात्रे मुहूर्तलक्षणमनु भोगचक्रपरिलेख ॥
त्रिंशद्धामसञ्चारिणः सृष्टिमहोवथविन्दव ' मनव ' मुहूर्ताः ॥ ईश्वराव्ययमनोऽवस्थानहृदय मनु ।
'पुनन्तु मा देवजनाः पुनन्तु मनवो धिया । पुनन्तु विश्वामूतानि पवमानः पुनातु मा ' ॥ अथर्व ६।१९।११

"त्रिंशद्धामानि राजति वाक् पतङ्गाय धीयते प्रतिवस्तो रहद्युभिः"

मन्वन्तरं तु दिव्यानां युगानामेक सप्ततिः ७१ दैवे युग सहस्रे द्वे ब्राह्मः कल्पौतु तौ नृणाम् ॥



७१ दिव्ययुगानि १ मन्वन्तरम् ॥ १००० दिव्य युगानि ब्राह्ममहः । १००० दिव्ययुगानि ब्राह्मी रात्रिः ।

७१ ,,	७१ ,,	७१ ,,	७१ ,,
७१ ,,	७१ ,,	७१ ,,	७१ ,,
७१ ,,	७१ ,,	७१ ,,	७१ ,,
७१ ,,	७१ ,,	७१ ,,	७१ ,,
७१ ,,	७१ ,,	७१ ,,	७१ ,,
७१ ,,	७१ ,,	७१ ,,	७१ ,,
७१ ,,	७१ ,,	७१ ,,	७१ ,,
०३ ,,	०३ ,,	०३ ,,	०३ ,,
५०० ब्राह्मे ऽहनि पूर्वाह्णम्	५०० ब्राह्मे ऽहनि अपराह्णम्	५०० पूर्वरात्रे	५०० अपररात्रे

७१ दिव्ययुगानि १ मन्वन्तरम्

सृष्ट्यहोरात्रो मनु

७१ दिव्ययुगानि १ मन्वन्तरम्

भोगचक्र परिलेखः

७१
७१
७१
७१
७१
७१
७१
०३
५००

ब्राह्ममहः पूर्वाह्नम्

ब्राह्ममहः अपराह्नम्



सृष्टि महोक्क विन्दुः मनः ३० त्रिंशद्धामानि

त्रिंशद्धामानि राजतिवाक् पतङ्गाय

पीयते प्रतिवस्तो रहद्युभिः

दिव्ययुगानि
७१ ,,
७१ ,,
७१ ,,
७१ ,,
७१ ,,
७१ ,,
७१ ,,
०३ ,,
५००

मन्वन्तराणि
ब्राह्मी रात्रिः
अपररात्रम्

दिव्ययुगानि
,, ७१
,, ७१
,, ७१
,, ७१
,, ७१
,, ७१
,, ७१
,, ०३
५००

मन्वन्तराणि
ब्राह्मी रात्रिः
पूर्वरात्रम्

सृष्ट्यहोरात्रे मनुभोगचक्र परिलेखः

सृष्टि महोवश्च विन्दुः मनुः ।



पुनन्तु मा देवजनाः पुनन्तु मनवो धिया ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम् ॥
मनुरीश्वरात्माव्ययमनोऽवरथानहृदयम् ।

तस्य चैतस्य महाकालस्य तदवान्तरकालकल्पनामन्तरेण विज्ञानं दुर्घटमित्यतः कालावयवाः
१ २ ३ ४ ५ ६
कल्प्यन्ते। षट्संस्था हि ते भवन्ति—मुहूर्तो दिनं मासो वत्सरो युगं कल्प इति। पूर्वपूर्वाध्यूढोय-
(३०) (१२)
मुत्तरः कालः। त्रिंशता मुहूर्तैरेकं दिनम्। दिनमित्यहोरात्रसंज्ञा। त्रिंशता दिनैरेको मासः। द्वादशभिर्मासै-
(४३२०००)
रेको वत्सरः। वत्सराणां त्रिचत्वारिंशल्लक्षैर्विंशतिसहस्रोपेतैरेकं युगम्। युगसहस्रं कल्प इति। मानुष-
मानेनेदमाख्यातम्। चतुर्धा हि कालमानं भवति—मानुष्यं पित्र्यं दैवं ब्राह्मं चेति॥ सूर्य्यस्य दर्शनमहः। अदर्शनं रात्रिः। तथा च सूर्य्यदर्शनादर्शनपरिच्छिन्नः कालोऽहोरात्रः। तत्र पृथिव्या लङ्कादिप्रदेशे सूर्य्य-
दर्शनादर्शनाभ्यां कल्पितोऽहोरात्रो मानुष्यः सोऽस्माकमेकं दिनम्॥ उदयाद्यहः। अस्तमयादीरात्रिः। अथ चन्द्रमण्डले ताभ्यां कृप्तः स पित्र्योऽहोरात्रः। सोऽस्माकमेकोमासः। कृष्णाष्टम्याद्यहः। शुक्लाष्टम्यादी रात्रिः। अथ-पृथिव्याः सुमेरुप्रदेशे ताभ्यांकृप्तः स दैवाहोरात्रः। सोऽस्माकमेको वत्सरः। उत्तरगोल-
गतिरहः। दक्षिणगोलगती रात्रिः। अथ ब्रह्माण्डनाभौ ताभ्यां कृप्तः स ब्राह्मोऽहोरात्रः। सोऽस्माकं द्वौ कल्पौ। सृष्टिकल्पोऽहः। प्रलयकल्पो रात्रिः॥ इतीत्थं चतुर्विधा तावदहोरात्राः। मनुष्याहोरात्र-
मूला मासादयो मानुष्याः। एवं पित्र्यमूलाः पित्र्याः। दैवमूला दैवाः। ब्राह्ममूलास्तु ब्राह्माः स्युः॥ अहो-
रात्रस्य च तस्य तस्य त्रिंशत्तमो भागो मुहूर्त्तः। तत्र चतुर्दश मुहूर्त्ताः सूर्य्यप्रकाशकालः। तावन्त एव ते सूर्य्या-
दर्शनकालः। अथ द्वौ मुहूर्तौ द्वे सन्ध्ये पृथग्व्यवतिष्ठेते। तदित्थं ब्राह्मस्याहोरात्रस्य येऽमी आन्हिका-
श्चतुर्दश मुहूर्तास्त एवेह चतुर्दश मन्वन्तराणीत्याख्यायन्ते व्यवहारविशेषार्थम्॥ एकैककल्पस्थस्य च युग-
साहस्रस्य चतुर्दशधाहरणेऽवशिष्टानां षड्युगानां सन्ध्याविभागेऽन्तर्भावः। सन्ध्यामुहूर्तावशिष्टानां तु
पञ्चषष्टियुगानामुपपादनं न क्वाप्युपलभ्यत इत्यनुसन्धेयम्॥ तदित्थं गृहीते तावदेकैकस्मिन् मन्वन्तरे तानि
युगान्येकसप्ततिमितान्यन्तर्भवन्ति। उक्तं च—

मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः।
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम्॥ १॥
सहस्रयुगपर्य्यन्तमहर्यद् ब्रह्मणो विदुः॥
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः॥ २॥
मन्वन्तराणि जायन्ते कल्पे कल्पे चतुर्दश॥
मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः॥ ३॥

मन्वन्तरमिति मनोरन्तरं भोगकालः। तदेतदन्तरभेदान्मनवश्चतुर्दश भवन्ति—स्वायम्भुवः, स्वारो-
चिषः, उत्तमः, तामसः, रैवतः, चाक्षुषः, वैवस्वतः, सावर्णिः, दक्षसावर्णिः, ब्रह्मसावर्णिः, धर्मसावर्णिः
रुद्रसावर्णिः, दैवसावर्णिः, इन्द्रसावर्णिरिति व्यवहारार्थं संज्ञाकरणम्। रौच्यो भौत्य इत्युत्तमतामसयोः संज्ञा
विशेषौ॥ तदुक्त —

स्वायंभुवं स्यात्प्रथमं ततोऽन्यत् स्वारोचिषं चोत्तमतामसे च ।
स्याद्रैवतं चाक्षुषमन्यदस्मात् वैवस्वतं सप्तममामनन्ति ॥
अन्ये तु सावर्ण्य एव सप्त स्युरुत्तरादूर्ध्वेऽहनि चान्तरेशाः ।
ते चार्कदक्षाभिधब्रह्मधर्मरुद्राख्यदेवेन्द्रपदैः प्रसिद्धाः ॥
य उत्तमः स क्व च रौप्य उक्तः स भौत्य उक्तः क्व च तामसो यः ।
मन्वन्तराणां च तदित्थमुक्तान्येतानि नामानि चतुर्दशानाम् ॥

अथैकस्मिन् कल्पे यान्येतानि सहस्रं युगान्याख्यातानि यानि वैकस्मिन्मन्वन्तरे एकसप्ततियुगान्युक्तानि, तदेतदेकैकं युगं द्वादशभिर्वत्सरसहस्रैः संपद्यते । तस्य पुनश्चत्वारो विभागा धर्म्मविशेषानुरोधात् प्रकल्प्यन्ते सत्यं त्रेता द्वापरः कलिश्चेति । "एतद्वै मनुष्येषु सत्यं निहितं यच्चक्षुरित्यादि श्रुत्या प्रत्यक्षादिभिः प्रमाणैः सुपरीक्षितमेवार्थं यत्र लोका गृहीत्वा तदनुसारेण कर्म्म कुर्वन्ति नानृते सज्जन्ते नापरीक्षिते न मिथ्या विश्वासे स सत्यधर्मनिष्ठाकालः सत्यं नाम । स वैदिकमन्त्रप्रादुर्भावकालः ॥ १ ॥

अथ—"मन्त्रेषु कर्म्माणि कवयो ऋषयो यान्यपश्यंस्तानित्रेतायां बहुधा संततानि"—इत्यादिश्रुत्या त्रेताग्निसाध्यानामग्न्याधानाद्यग्निचयनान्तानां यज्ञकर्मणां प्रचारकालस्त्रेता नाम ॥ २ ॥ अथ कर्म्मणां पारक्यानां साफल्यवैफल्ययोः सन्देहप्रादुर्भावात् क्रमाद्विरक्तिमापन्नानां कर्म्मपरित्यागापरित्यागकालो द्वापरो नाम ॥ ३ ॥ द्वापरः सन्देहः ॥ अथ वैदिकशास्त्रार्थे विरक्तानां स्वेच्छामात्रेण भिन्नं भिन्नं पन्थानं प्रकल्प्य प्रकल्प्य तत्र प्रचरतां मतभेदात् परस्परविरुद्धावैदिकधर्मावलम्बिनामन्योन्यविवादपरायणानामयं घोरकलहकालः कलिर्नाम ॥ ४ ॥ एते च मनुष्यप्रकृतिविशेषा दैवायत्ता एवोत्पद्यन्ते प्रभवन्ति विपरिणमन्तेऽपक्षीयन्ते विलीयन्ते च । ध्रुवतारामनु परिभ्रमतां सप्तर्षीणां ध्रुवतारासंचारवशात् ब्रह्मवर्चसौदयिकहंसाभिजित्तारकामण्डले सन्निकर्षविप्रकर्षतारतम्यानुरोधेन सप्तर्षितेजस्तारतम्योपपत्तियुगविशेषोपपादकबुद्धिविशेषोदये हेतुरिति हि स्थितिः ॥ यद्यपि सर्वदा समभावेनावस्थातुमनर्हाश्चैते सर्वकालेष्वेव यथाकथंचिन्न्यूनाधिकतारतम्येनावतिष्ठन्ते एव तथापि वैशेष्यात्तु तद्वाद इति शारीरकसूत्रन्यायात् तद्वैशेष्यात्तद्वादः प्रकल्प्यते । अहन्यप्यन्धकाराणां रात्रावपि प्रकाशानां शुक्लपक्षकृष्णपक्षयोरुभयोरेव तारतम्येन तमिस्र ज्योतिषोरुपपत्तावपि प्राधान्याद्विशेषव्यपदेशावक्लृप्तिवत् । एष च वैदिकधर्म्मविश्वासवैशेष्यादिह युगविभागः समाख्यातः ॥

तथाहि—वैदिकसत्यविज्ञाननिष्ठाप्रचारकालः सत्ययुगम् (१) । सत्यविज्ञानाधारेणैहिकपारत्रिकोन्नतिप्रदकर्मनिष्ठाप्रचारकालस्त्रेतायुगम् (२) । कृतकर्म्मणां फलाफलदर्शनादनिष्ठया संदेहप्रचारकालो द्वापरयुगम् (३) । संदेहकालादूर्ध्वं कर्म्मणां फलप्रदत्वाफलप्रदत्वयोरेकैकपक्षपर्य्यवसायिनां परस्परकलहकालः कलियुगम् (४) । इति वैदिकविज्ञानसम्बन्धेनैवैतानि चत्वारि युगानि ॥ अतएव च—

"चतुर्युगान्ते वेदानां जायते किल विप्लवः ।
प्रवर्तयन्ति तानेत्य भुवि सप्तर्षयो दिवः ॥"

इति वैदिकधर्मविज्ञानानामुत्थान-विकाश-विकृति-पतनक्रमाद्वेदसम्बन्धेनैव चतुर्युगव्यवस्थानमिङ्गयन्ति ॥ १ ॥

(२) परे तु कर्म्मप्रवृत्तिवैशेष्यादेव युगविभागकृप्तिमाहुः-तथा च श्रूयते—

कलिः शयानो भवति संजिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन् ॥ इति ॥

कृतमितिप्रथमं युगमाह । स्वस्वकर्म्मनिष्ठताकालः कृतयुगम् (१)। कर्म कर्तुं वाग्बुद्धिशरीराणामारम्भोन्मुखतया तत्परताकालस्त्रेतायुगम् (२)। कुर्य्यामिदं न कुर्य्यां वा, कृतेनानेनाकृतेन वा किं भविष्यतीत्येवं पक्षद्वयपरामर्शकालो द्वापरयुगम् । (३) ॥ मनोवाक्छरीरेषु प्रसुप्तबलानुदयादनुत्साहिनामलसानां मौनमातिष्ठमानानां स्वकर्तव्यविषयोदासीनानामप्रवृत्तिःशयनकालः कलियुगमिति भेदः (४) ॥

(३) अथापरे वैदिकधर्म्मरूपाधिक्यन्यूनत्वाभ्यां युगव्यवस्थामाहुः । तथा च स्मर्य्यते—

चतुष्पात् सकलो धर्मः सत्यं चैव कृते युगे ॥
नाधर्मेणागमः कश्चिन्मनुष्यान् प्रति वर्तते ॥ १ ॥
इतरेष्वागमाद्धर्म्मः पादशस्त्ववरोपितः ।
चौरिकानृतमायाभिर्धर्म्मश्चापैति पादशः ॥ २ ॥ इति ॥

(४) अथापरे वैदिकधर्मविशेषप्रचारविशेषानुरोधाद् युगव्यवस्थामाहुः । यथा—

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ ३ ॥ इति ॥

अत्रायमभिषङ्गः । ज्ञानयुगं कृतयुगम् ॥ १॥ तत्र तपसा ज्ञानमुत्पद्यते इत्यतो ज्ञानोदयार्थं तपःप्रवणता कृतयुगरूपम् । अथ यज्ञयुगं त्रेतायुगम् । यज्ञश्चायं वैदिकज्ञानं विना न शक्यं कर्तुम् । अतो यज्ञसिद्धयर्थं ज्ञानप्रवणता त्रेतायुगरूपम् । २। अथदानयुगं द्वापरयुगम् । तच्च भूरिदक्षिणयज्ञान्ते नियमेन दीयते इत्यतो दानोपपत्त्यर्थं यज्ञविधानप्रवणता द्वापरयुगरूपम । ३। अथ कलहविद्रोहजाड्यादिप्रधानेऽस्मिन् कलियुगे लक्ष्मीपात्राणामनधिकसंपदां दानपराङ्मुखतया दानकर्मण्युत्साहाभिवृद्ध्यर्थं दानमेव परमो धर्मो दीयतामित्येवं दीनजनोद्घोषः कलियुगरूपम् । ४ । तदित्थं वेदविज्ञानबलतारतम्यात्, कर्म्मप्रवृत्तिबलतारतम्यात्, धर्मरूपबलतारतम्याद्, धर्मविशेषबलतारतम्याच्चेति चतुर्धा युगविभागव्यवस्थामनुमन्यन्ते मान्या इति दिक् ॥ ० ॥

दिव्ययुगव्यवस्था

एतस्यैकस्यैव युगस्यैते चत्वारो विभागा अपि युगशब्दैनैव व्यपदिश्यन्ते । तेषामेकैकस्य मानं भिद्यते । तथाहि-द्वादशवर्षसहस्रात्मकस्यास्य दिव्ययुगस्य दश विभागाः कल्प्याः ते पादाः ॥ तेनायमेकैकः

पादो दशांशतया द्वादशवर्षशतात्मको भवति। ज्ञानमेकम्॥ अथ तपो यज्ञो दानमिति त्रीणि कर्म्माणि। तदित्थमेकं ज्ञानं त्रीणि च कर्माणीति चतुष्पाद्वृषो धर्मरूपम्। चतुष्पादस्य धर्मस्य पादचतुष्टयस्थितितारतम्यानुरोधेनास्य दिव्ययुगस्य पादव्यवस्था नियम्यते। तथाचैते धर्मानुरोधपरिकल्पिताश्चत्वारः पादाः कृतयुगम्। त्रयः पादास्त्रेतायुगम्। द्वौ पादौ द्वापरयुगम्। एकः पादः कलियुगम्॥ तद्यथा—

चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः॥ १॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु॥
एकापायेन वर्तन्ते सहस्राणि शतानि च॥ २॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम्॥
एतद् द्वादशसाहस्रं देवानां युगमुच्यते॥ ३॥
दैविकानां युगानां तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्विद्यात्तावतीं रात्रिमेव च॥ ४॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः॥
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः॥ ५॥ इति॥

चत्वारि शतानि चत्वारि सहस्राणि चत्वारि शतानीत्येवं विभागादष्टाचत्वारिंशद्वर्षशतानि देवानां कृतयुगम्॥ १॥ अथैकपादहान्या त्रीणि शतानि त्रीणि सहस्राणि त्रीणि शतानीति विभागात् षट्त्रिंशद्वर्षशतानि देवानां त्रेतायुगम्॥ २॥ अथ द्विपादहान्या द्वे शते द्वे शहस्रे द्वे शते इति विभागाच्चतुर्विंशतिवर्षशतानि देवानां द्वापरयुगम्॥ ३॥ अथ त्रिपादहान्या एकं शतमेकं सहस्रमेकं शतमिति विभागाद् द्वादशवर्षशतानि देवानां कलियुगम्॥ ४॥ यथा—

	दैवमानेन				मानुषमानेन			
	संध्या	युगम्	संध्यांशः	दैवमानेन वर्षाणि	मानुषमानेन वर्षाणि	सं०	यु०	सं०
सत्यम्–	४००	४०००	४००	४८००	१७२८०००	१४४०००	१४४००००	१४४०००
त्रेता–	३००	३०००	३००	३६००	१२९६०००	१०८०००	१०८००००	१०८०००
द्वापरः–	२००	२०००	२००	२४००	८६४०००	७२०००	७२००००	७२०००
कलिः–	१००	१०००	१००	१२००	४३२०००	३६०००	३६००००	३६०००
	१०००	१००००		१२०००	४३२००००	४३२००००		
१	२	३	४	५	६	७	८	९

दैवमानेनैतानि चतुर्य्युगस्थानां खण्डयुगानां मानान्युक्तानि। तान्येव षष्ट्युत्तरत्रिशत्या गुणितानि मानुषाणि वत्सराणि संपद्यन्ते। यथा—चतुर्दशलक्षाणि चत्वारिंशत्सहस्राणि च कृतंयुगम्। तस्यैकलक्षं चतुश्चत्वारिंशत्सहस्रोपेतं सन्ध्या तावानेव सन्ध्यांशश्च ॥ १ ॥ अथ दशलक्षाणि अशीतिसहस्राणि च त्रेतायुगम्॥ तस्यैकलक्षमष्टसहस्रोपेतं सन्ध्या तावानेव सन्ध्यांशश्च ॥ २ ॥ अथ सप्तलक्षाणि विंशतिसहस्राणि च द्वापरयुगम्॥ तस्य द्वासप्ततिसहस्राणि सन्ध्या तावानेव सन्ध्यांशश्च ॥ ३ ॥ अथ त्रीणि लक्षाणि षष्टिसहस्राणि च कलियुगम्॥ तस्य षट्त्रिंशत्सहस्राणि सन्ध्या तावानेव सन्ध्यांशश्चेति ॥ ४ ॥

अथवैतदेवं द्रष्टव्यम्। षष्ट्युत्तरत्रिशतीमिता हि द्युममण्डलस्यांशा इष्यन्ते॥ तत्र प्रत्यंशं शतं शतं वत्सराणां बृहदवस्थानात् षट्त्रिंशत्सहस्राणि भवन्ति तानि बृहतीसहस्राण्युच्यन्ते। बृहतीसहस्राण्येव द्वादशगुणितानि युगपादः। तादृशैश्चतुर्भिर्युगपादैः कृतयुगम्। त्रिभिस्त्रेता। द्वाभ्यां द्वापरः। एकेन कलिरिति व्यवस्थानात् सप्तदशलक्षाण्यष्टात्रिंशतिसहस्राणि कृतयुगम्॥ १ ॥ द्वादशलक्षाणि षण्णवतिसहस्राणि त्रेतायुगम्॥ २ ॥ अष्टलक्षाणि चतुःषष्टिसहस्राणि द्वापरयुगम् ॥ ३ ॥ चतुर्लक्षाणि द्वात्रिंशत्सहस्राणि कलियुगमित्येवं चतुर्य्युगं त्रिचत्वारिंशल्लक्षैर्विंशतिसहस्रोपेतैः संपद्यते॥ एतावदिदं दिव्ययुगं नामाख्यायते कल्पः। तत्सहस्रं सृष्टिकल्पः स सृष्टिकालो ब्रह्माहः। तावत्कालमेवास्य सूर्य्यस्य दृश्यमानत्वात्। तावानेव प्रतिसृष्टिकल्पः। स प्रलयकालो ब्रह्मरात्रिः। तावत्कालमेवास्य सूर्य्यस्य प्रलयेनादृश्यमानत्वात्। उक्तं च—

अहोरात्रे विभजते सूर्य्यो मानुषदैविके।
रात्रिः स्वप्नाय भूतानां चेष्टायै कर्म्मणामहः॥ १ ॥
तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते।
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम्॥ २ ॥

‡ त्रिंशत्कल्पाः

एतैश्च कल्पैस्त्रिंशन्मितैरेको ब्राह्मो मासः। तेषां नामानि कल्प्यन्ते व्यवहारार्थम्॥ यथा—श्वेतवाराहः। १। नीललोहितः। २। वामदेवः। ३। राथन्तरः। ४। रावणः। ५। प्राणः। ६। बृहत्। ७। कन्दर्पः। ८। सत्यः। ९। ईशानः। १०। व्यानः। ११। सारस्वतः। १२। उदानः। १३। गरुडः। १४। कूर्म्मः। १५। इति शुक्लपक्षस्थानि पञ्चदशान्यहानि॥ तत्र कूर्म्मः पौर्णमासी॥ अथ नारसिंहः १। समानः २। आग्नेयः। ३। सोमः। ४। मानवः। ५। तत्पुरुषः। ६। वैकुण्ठः। ७। लक्ष्मीः। ८। सावित्री। ९। घोरः १०। वाराहः। ११। वैराजः। १२। गौरी। १३। माहेश्वरः। १४। पितृकल्पः। ३०—इति कृष्णपक्षस्थानि पञ्चदशान्यहानि॥ तत्र पितृकल्पोऽमावास्या॥ क्वचिन्नामभेदो दृश्यते तत्प्रमादादित्यवधेयम्॥ ईदृशैरेव मासैर्द्वादशभिर्ब्राह्मः संवत्सरः इति वदन्ति॥ तद्यथा—

---

‡ अत्र नित्यकल्पसप्तकल्पयोः पाठस्त्रुटितो विद्यते इति ध्येयम्।

	शुक्लपक्षस्य पञ्चदश तिथयः		कृष्णपक्षस्य पञ्चदश तिथयः
१	श्वेतवाराहः	कल्पः	नारसिंहः कल्पः
२	नीललोहितः	”	समानः ”
३	वामदेवः	”	आग्नेयः ”
४	राथन्तरः	”	सोमः ”
५	रावणः	”	मानवः ”
६	प्राणः	”	तत्पुरुषः ”
७	बृहत्	”	वैकुण्ठः ”
८	कन्दर्पः	”	लक्ष्मीः ”
९	सत्यः	”	सावित्री ”
१०	ईशानः	”	घोरः ”
११	मानः	”	वाराहः ”
१२	सारस्वतः	”	वैराजः ”
१३	उदानः	”	गौरी ”
१४	गरुडः	”	माहेश्वरः ”
१५	कूर्म्मः	पूर्णिमा	पितृकल्पः अमावास्या

तत्रेदानीं श्वेतवाराहः कल्पः । तत्र वैवस्वतमन्वन्तरम् । तत्रापि अष्टाविंशतितमं चतुर्युगम्। तत्रापि कलियुगस्येदानीं पञ्चसहस्रवत्सराण्यतीतानि॥ एतच्च सर्वसाधारणैः परीक्षितुमशक्यमप्याप्तवाक्यादेवाभ्युपगम्यते ॥

तदित्थं सृष्टिप्रलयाभ्यां पुनः पुनः कृताभ्यां धारावाहिकाभ्यां परिवर्तमानमिदमनाद्यनन्तं जगच्छाश्वतिकं ब्रह्मतत्वमित्यवधेयम् ॥ ० ॥

इति मन्वन्तरनिर्धारः समाप्तः ॥

मन्वन्तरनिर्धार-हिन्दी रूपान्तर

१. युग
२. दिव्ययुग
३. नित्यकल्प
४. सप्तकल्प
५. त्रिंशत् कल्प

मन्वन्तर निरूपण में, युग, दिव्ययुग, नित्यकल्प, सप्त कल्प तथा त्रिंशत् कल्प का निरूपण किया गया है।

सृष्टि के विषय में दो मत प्रचलित हैं। एक मत जगत् को सादि व सान्त अर्थात् उत्पत्ति-विनाशशील मानता है, क्योंकि जगत् कार्य है और कार्यवस्तुओं की उत्पत्ति, स्थिति व नाश लोक में दृष्टिगोचर होते हैं जैसे घटपटादि कार्यवस्तुओं के।

दूसरा मत मानता है कि जगत् अनादि व अनन्त है अर्थात् नित्य है. क्योंकि उसमें प्रवाह-नित्यता विद्यमान है। जिस प्रकार जलतरङ्गों के प्रतिक्षण परिवर्तनशील होने पर भी गङ्गाप्रवाह नित्य है क्योंकि उसका कभी विराम (नाश) नहीं होता। उसी प्रकार जगदन्तर्वर्ती पदार्थों के प्रतिक्षण परिवर्तित होने पर भी जगत् में प्रवाहनित्यता विद्यमान है, जगत् का कभी अभाव नहीं होता। तात्पर्य्य यह है कि जगदन्तर्वर्ती पूर्व पदार्थ नष्ट होते रहते हैं और नवीन उत्पन्न होते रहते हैं किन्तु जगत्प्रवाह का कभी अभाव नहीं होता वह अविच्छिन्न रूप से सदा चलता ही रहता है।

इन दोनों मतों में विद्वान् द्वितीय मत को ही सङ्गत मानते हैं क्योंकि जगत् का नाश मानने पर उसकी उत्पत्ति में कोई कारण न होनेसे जगत् की उत्पत्ति आकस्मिक होने लग जायगी। और आकस्मिक जगदुत्पत्तिवाद को युक्तिमूलक न होने से विद्वान् उचित नहीं मानते। ईश्वरेच्छा को जगदुत्पत्ति में कारण मानने पर ईश्वरेच्छा के नित्य होने से जगत् में नित्यत्व स्वतः सिद्ध हो जाता है। ईश्वरेच्छा को अनित्य माना नहीं जा सकता, क्योंकि उसके अनित्य मानने पर ईश्वरेच्छा में उपर्युक्त आकस्मिकता-दोष की आपत्ति होगी। यद्यपि ईश्वरेच्छा में ईश्वर के स्वातन्त्र्य को कारण मानकर इस दोष का परिहार किया जा सकता है तथापि ईश्वरेच्छा को अनित्य मानने पर ईश्वर में भी अनित्यता-दोष की आपत्ति होगी, क्योंकि ईश्वरेच्छा, 'धर्म धर्मी का अभेद होता है' इस न्याय से ईश्वररूप है।

यद्यपि जगत् को नित्य मानने पर श्रुतिप्रतिपादित मुक्तिवाद का विरोध आता है, क्योंकि मुक्ति [1]जगद्विच्छेदरूप है और जगत् को नित्य मानने पर उसका विच्छेद (नाश) सम्भव नहीं है, तथापि मुक्ति

---

[1] संसार पद से अविद्या, काम, कर्म वासना आदि का तथा जगत् पद से दृश्यमान लौकिक पदार्थों का ग्रहण है। दूसरे शब्दों में कहा जाय तो जगत् पद से ईशसङ्कल्पविरचित बाह्यजगत् का तथा संसार पद से जीव-सङ्कल्पनिर्मित मानस या धीमय जगत् का ग्रहण है। इनमें जीवनिर्मित मानस जगत् ही जन्ममरणरूप बन्धन का कारण है ईशनिर्मित बाह्य जगत् नहीं। इसलिये पञ्चदशीकार श्री विद्यारण्य स्वामी ने जीवनिर्मित मानस जगत् को ही बन्धन का कारण बतलाया है, जैसे—

अन्वयव्यतिरेकाभ्यां धीमयो जीवबन्धकृत्

में जगत् का विच्छेद नहीं होता किन्तु मुक्तपुरुष के संसार का विच्छेद होता है यह मान लेने पर कोई दोष नहीं रहता। मुक्तिदशा में जगत् का नाश न होने पर भी मुक्तपुरुष के संसार का विच्छेद बन सकता है।

पुण्य और पाप के क्षीण हो जाने पर मनुष्य पुनः मर्त्यलोक में आ जाता है इत्यर्थक श्रुति भी जगत् में मुक्त पुरुष की अपुनरावृत्ति (जगत् में पुनः न आना) को मुक्ति सिद्ध कर रही है न कि मर्त्यलोक के अभाव को मुक्ति बतला रही है। 'मृत्युमत्येति' इत्यादि श्रुति भी मृत्यु का सम्बन्ध न होना ही मुक्ति है इसी तथ्य का प्रतिपादन कर रही हैं। इस प्रकार मुक्ति में वासनादिसंसर्गशून्यता अभीष्ट है जगद्विच्छेद नहीं। और यही उचित भी है। अन्यथा शुक, वामदेव आदि योगियों में किसी एक की भी मुक्ति से जगत् का उच्छेद होजाने पर अन्य व्यक्तियों का मुक्ति के लिये प्रयास व्यर्थ होगा, क्योंकि एक की मुक्ति से जगद्विच्छेद हो चुका है और आपकी रीति से जगद्विच्छेद ही मुक्ति है। जगद्विच्छेद को मुक्ति मानने पर प्रत्यक्षविरोध भी है, क्योंकि शुकादि की मुक्ति होने पर भी जगत् पूर्ववत् दृष्टिगोचर होरहा है। उसका नाश नहीं हुआ है। यदि यह कहा जाय कि आज तक किसी की मुक्ति हुई नहीं, और जब किसी की मुक्ति हो जायगी तब सारे जगत् का उच्छेद हो ही जायगा तो प्रकारान्तर से मुक्ति का ही अपलाप होगा। क्योंकि यदि महामहिमशाली प्राचीन महर्षियों में भी किसी एक की भी प्रयास करने पर भी आज तक मुक्ति न हुई तो आगे उसकी क्या सम्भावना है। इस प्रकार मुक्ति एक असम्भव वस्तु हो जायगी। इसलिये यही मानना उचित है कि मुक्ति में जगत् का विच्छेद नहीं होता किन्तु मुक्तपुरुष का अपने वासनामय संसार से विच्छेद होता है।

जगत् को नित्य मानने पर जिससे सारे प्राणी उत्पन्न होते हैं जिसके कारण उत्पन्न होकर जीवित रहते हैं और अन्त में नष्ट होते समय जिसमें लीन होजाते हैं एतदर्थक 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इत्यादि श्रुतियों से प्रतिपादित जगत् की उत्पत्ति, स्थिति व विनाश का विरोध होगा। यह शङ्का भी उचित नहीं है। क्योंकि जिस प्रकार स्वप्नप्रपञ्च की उत्पत्त्यादि

सत्यस्मिन् सुखदुःखे स्तस्तस्मिन्नसति न द्वयम् ।
असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः ॥
समाधिसुप्तिमूर्च्छासु सत्यप्यस्मिन्न बध्यते ।
अतः सर्वस्य जीवस्य बन्धकृन्मानसं जगत् ॥

अन्वय व्यतिरेक के द्वारा जीवकृत मानस जगत् ही बन्धन का कारण है, क्योंकि स्वप्नादि में बाह्य संसार के अभाव में भी जीव मानस जगत् के कारण सुख दुःख का अनुभव करता है। तथा समाधि सुषुप्ति व मूर्च्छा दशा में बाह्य जगत् के होने पर भी वह मानस जगत् के अभाव से दुःख का अनुभव नहीं करता। अतः यह मानस जगत् ही जीवों के बन्धन का कारण है। यह मानस जगत् ही लोकान्तरप्राप्ति व जन्ममरणरूप संसार का कारण होने से यहाँ संसारपद से व्यवहृत किया गया है। और बाह्य जगत् संसरण का कारण न होने से संसारपद से व्यवहृत न होकर जगत् पद से ही कहा गया है।

